# Mahodara Stuti Naradamunikrita

# નારદમુનિકૃતા મહોદરસ્તુતિઃ

## Document Information

Text title : Mahodara Stuti Naradamunikrita

File name : mahodarastutiHnAradamunikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 8 | 3.8. 26-40||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા મહોદરસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવર્ષય ઊચુઃ ।

નમસ્તે ગણનાથાય મહોદરસ્વરૂપિણે ।
અનાથાય ચ નાથાય સર્વેષાં તે નમો નમઃ ॥ ૨૬॥
અનાદિસિદ્ધિનાથાય બુદ્ધિનાથાય ઢુણ્ઢયે ।
હેરમ્બાય સ્વભક્તેભ્યઃ સર્વદાય નમો નમઃ ॥ ૨૭॥
ચતુર્બાહુધરાયૈવ શૂર્પકર્ણાય તે નમઃ ।
લમ્બોદરાય વિઘ્નેશ વિઘ્નવારણ તે નમઃ ॥ ૨૮॥
ગજાનનાય દેવાયાऽખુવાહાય મહાત્મને ।
શેષનાભિસ્થિતાયૈવૈકદન્તાય નમો નમઃ ॥ ૨૯॥
મહાગણપતે તુભ્યં સર્વકારણકારણ ।
ભક્તવાઞ્છાવિધાતાનાં હરાય તુ નમો નમઃ ॥ ૩૦॥
માયાશ્રયાય માયાયાધારકાય મહાભુજ ।
અભક્તકામદહનરૂપાય ચ નમો નમઃ ॥ ૩૧॥
યોગાનાં પતયે તુભ્યં યોગદાત્રેऽવ્યયાય તે ।
સ્વાનન્દવાસિને ચૈવ યોગાકારાય તે નમઃ ॥ ૩૨॥
સર્વેષાં જઠરેષુ ત્વં સ્થિત્વા ભોગાન્ કરોષિ વૈ ।
ભોક્તા ત્વદુદરે વૈ ન કોऽપિ તેન મહોદરઃ ॥ ૩૩॥
દેહદેહિસમાયોગે બોધબ્રહ્મણિ સંસ્થિતમ્ ।
કો જાનાતિ ચ તં દેવં સોऽપિ દર્શનતાં ગતઃ ॥ ૩૪॥
ભક્તવત્સલભાવેન પ્રકટસ્ત્વં સમાગતઃ ।
વયં તેન કૃતાર્થાશ્ચ દેવદેવેશ નિશ્ચિતમ્ ॥ ૩૫॥
વયં ધન્યા યતો દૃષ્ટઃ સર્વોદરવિલાસકૃત્ ।
મહોદરઃ પ્રસન્નાત્મા સાક્ષાદ્બ્રહ્મપતિઃ પ્રભુઃ ॥ ૩૬॥
કિં સ્તૌમિ ત્વાં ગણાધીશ વેદાદીનાં તથોદરે ।

સંસ્થિતં પ્રણમામસ્તં યોગગમ્યં સનાતનમ્ ॥ ૩૭॥
રવિરુવાચ ।
એવં સ્તુતિં સમાકર્ણ્ય પ્રણયેન સુતોષિતઃ ।
જગાદ તાન્ ગણેશાનો ભક્તિભાવનિયન્ત્રિતઃ ॥ ૩૮॥
(ફલશ્રુતિઃ)
મહોદર ઉવાચ ।
વૃણુધ્વં સર્વદેવેશા મુનયશ્ચ યથેપ્સિતમ્ ।
દાસ્યામિ સકલં તદ્વો ભક્ત્યા સ્તોત્રેણ તોષિતઃ ॥ ૩૯॥
ભવત્કૃતમિદં સ્તોત્રં ભવેન્ મત્પ્રીતિવર્ધનમ્ ।
પઠતાં શ઼ૃણ્વતાં દેવાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૦॥

ઇતિ નારદમુનિકૃતા મહોદરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૮ । ૩.૮। ૨૬-૪૦॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 8 . 3.8. 26-40..

Proofread by Yash Khasbage, Preeti Bhandare

*Mahodara Stuti Naradamunikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*